श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टादशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टादशं दशकम् ॥

## पृथुचरितवर्णनम्

जातस्य ध्रुवकुल एव तुङ्गकीर्ते -
रङ्गस्य व्यजनि सुतः स वेननामा।
यद्दोषव्यथितमतिः स राजवर्य -
स्त्वत्पादे निहितमना वनं गतोऽभूत् ॥ 18.1 ॥

पापोऽपि क्षितितलपालनाय वेनः
पौराद्यैरुपनिहितः कठोरवीर्यः।
सर्वेभ्यो निजबलमेव सम्प्रशंसन्
भूचक्रे तव यजनान्ययं न्यरौत्सीत् ॥ 18.2 ॥

सम्प्राप्ते हितकथनाय तापसौघे
मत्तोऽन्यो भुवनपतिर्न कश्चनेति।
त्वन्निन्दावचनपरो मुनीश्वरैस्तैः
शापाग्नौ शलभदशामनायि वेनः ॥ 18.3 ॥

तन्नाशात् खलजनभीरुकैर्मुनीन्द्रै -
स्तन्मात्रा चिरपरिरक्षिते तदङ्गे।
त्यक्ताघे परिमथितादथोरुदण्डात्
दोर्दण्डे परिमथिते त्वमाविरासीः ॥ 18.4 ॥

विख्यातः पृथुरिति तापसोपदिष्टैः
सूताद्यैः परिणुतभाविभूरिवीर्यः।

वेनार्त्या कबलितसम्पदं धरित्री -
    माक्रान्तां निजधनुषा सममकार्षीः ॥ **18.5** ॥

भूयस्तां निजकुलमुख्यवत्सयुक्तै -
    र्देवाद्यैः समुचितचारुभाजनेषु।
अन्नादीन्यभिलषितानि यानि तानि
    स्वच्छन्दं सुरभितनूमदूदुहस्त्वम् ॥ **18.6** ॥

आत्मानं यजति मखैस्त्वयि त्रिधाम -
    न्नारब्धे शततमवाजिमेधयागे।
स्पर्धालुः शतमख एत्य नीचवेषो
    हृत्वाऽश्वं तव तनयात् पराजितोऽभूत् ॥ **18.7** ॥

देवेन्द्रं मुहुरिति वाजिनं हरन्तं
    वह्नौ तं मुनिवरमण्डले जुहूषौ।
रुन्धाने कमलभवे क्रतोस्समाप्तौ
    साक्षात् त्वं मधुरिपुमैक्षथाः स्वयं स्वम् ॥ **18.8** ॥

तद्दत्तं वरमुपलभ्य भक्तिमेकां
    गङ्गान्ते विहितपदः कदापि देव।
सत्रस्थं मुनिनिवहं हितानि शंस -
    न्नैक्षिष्ठाः सनकमुखान् मुनीन् पुरस्तात् ॥ **18.9** ॥

विज्ञानं सनकमुखोदितं दधानः
    स्वात्मानं स्वयमगमो वनान्तसेवी।
तत्तादृक्पृथुवपुरीश सत्वरं मे
    रोगौघं प्रशमय वातगेहवासिन् ॥ **18.10** ॥

॥ इति श्रीमन्नारायणीये अष्टादशं दशकं समाप्तम् ॥